# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ५०

तथा सञ्चोदितः सूतो लक्ष्मणेन महात्मना ।
तद्वाक्यमृषिणा प्रोक्तं व्याहर्तुमुपचक्रमे ॥१॥

पुरा नाम्ना हि दुर्वासा अत्रेः पुत्रो महामुनिः ।
वसिष्ठस्याश्रमे पुण्ये स वार्षिक्यमुवास ह ॥२॥

तमाश्रमं महातेजाः पिता ते सुमहायशाः ।
पुरोधसं महात्मानं दिदृक्षुरगमत्स्वयम् ॥३॥

स दृष्ट्वा सूर्यसङ्काशं ज्वलन्तमिव तेजसा ।
उपविष्टं वसिष्ठस्य सव्ये पार्श्वे महामुनिम् ।
तौ मुनी तापस श्रेष्ठौ विनीतस्त्वभ्यवादयत् ॥४॥

स ताभ्यां पूजितो राजा स्वागतेनासनेन च ।
पाद्येन फलमूलैश्च सोऽप्यास्ते मुनिभिः सह ॥५॥

तेषां तत्रोपविष्टानां तास्ताः सुमधुराः कथाः ।
बभूवुः परमर्षीणां मध्यादित्यगतेऽहनि ॥६॥

ततः कथायां कस्यां चित्प्राञ्जलिः प्रग्रहो नृपः ।
उवाच तं महात्मानमत्रेः पुत्रं तपोधनम् ॥७॥

भगवन्किं प्रमाणेन मम वंशो भविष्यति ।
किमायुश्च हि मे रामः पुत्राश्चान्ये किमायुषः ॥८॥

रामस्य च सुता ये स्युस्तेषामायुः कियद्भवेत् ।
काम्यया भगवन्ब्रूहि वंशस्यास्य गतिं मम ॥९॥

तच्छ्रुत्वा व्याहृतं वाक्यं राज्ञो दशरथस्य तु ।
दुर्वासाः सुमहातेजा व्याहर्तुमुपचक्रमे ॥१०॥

अयोध्यायाः पती रामो दीर्घकालं भविष्यति ।
सुखिनश्च समृद्धाश्च भविष्यन्त्यस्य चानुजाः ॥११॥

कस्मिंश्चित्करणे त्वां च मैथिलीं च यशस्विनीम् ।
सन्त्यजिष्यति धर्मात्मा कालेन महता किल ॥१२॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥१३॥

समृद्धैर्हयमेधैश्च इष्ट्वा परपुरञ्जयः ।
राजवंशांश्च काकुत्स्थो बहून्संस्थापयिष्यति ॥१४॥

स सर्वमखिलं राज्ञो वंशस्यास्य गतागतम् ।
आख्याय सुमहातेजास्तूष्णीमासीन्महाद्युतिः ॥१५॥

तूष्णीम्भूते मुनौ तस्मिन्राजा दशरथस्तदा ।
अभिवाद्य महात्मानौ पुनरायात्पुरोत्तमम् ॥१६॥

एतद्वचो मया तत्र मुनिना व्याहृतं पुरा ।
श्रुतं हृदि च निक्षिप्तं नान्यथा तद्भविष्यति ॥१७॥

एवङ्गते न सन्तापं गन्तुमर्हसि राघव ।
सीतार्थे राघवार्थे वा दृढो भव नरोत्तम ॥१८॥

तच्छ्रुत्वा व्याहृतं वाक्यं सूतस्य परमाद्भुतम् ।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥१९॥

तयोः संवदतोरेवं सूतलक्ष्मणयोः पथि ।
अस्तमर्कौ गतो वासं गोमत्यां तावथोषतुः ॥२०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com